No. of Printed Pages : 4

Sem-I-Sans-GE-$A_1$(R&B)

# 2023

**Time - 3 hours**

**Full Marks - 80**

*Answer* ***all units*** *as per instructions.*

*Figures in the right hand margin indicate marks.*

## UNITS - I & II

1. 'कंकणस्य तु लोभेन' इत्युक्तेः तात्पर्यं हितोपदेशग्रन्थानुसारं प्रतिपादयत । [15

अथवा

'मृग-जम्बुकयोः कथाम् उल्लिख्य तत्रस्थान् नीत्युपदेशान् आलोचयत ।

2. अधोलिखितेषु त्रयाणाम् उत्कलभाषया अनुवादं कुरुत । [5 × 3

(क) मातृवत् परदारेषु परद्रव्येषु लोष्ट्रवत् ।
आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः ।।

(ख) नदीनां शस्त्रपाणिनां नखिनां शृङ्गिणां तथा ।
विश्वासो नैव कर्त्तव्यः स्त्रीषु राजकुलेषु च ।।

(ग) यौवनं धनसम्पत्तिः प्रभुत्वमविवेकिता ।
एकैकमप्यनर्थस्य किमु यत्र चतुष्टयम् ।।

P.T.O.

(घ) रूपयौवनसम्पन्ना विशालकुलसम्भवा: ।
विद्याहीना न शोभन्ते निर्गन्धा इव किंशुका: ।।

(ङ) जातिमात्रेण किं कश्चिद् बध्यते पूज्यते क्वचित् ।
व्यवहारं परिज्ञाय बध्य: पूज्योऽथवा भवेत् ।।

3. केषांचित् पंचानां शब्दानां यथानिर्देशं रूपं लिखत । [2 × 5

(क) पितृ – षष्ठी बहुवचने

(ख) साधु – तृतीया बहुवचने

(ग) अस्मद् – पञ्चमी द्विवचने

(घ) गुणिन् – षष्ठी बहुवचने

(ङ) नदी – सप्तमी एकवचने

(च) लता – सप्तमी बहुवचने

(छ) फल – सप्तमी बहुवचने

## UNITS - III & IV

4. अधोलिखितेषु श्लोकेषु कस्यचित् द्वयस्य सप्रसङ्गं व्याख्यां कुरुत ।
[10 × 2

(क) देवतातिथिभृत्यानां पितृणामात्मनश्च य: ।
न निर्वपति पञ्चानामुच्छ्वसन्न स जीवति ।।

(ख) स्वाध्याय एतषां देवत्वं तप एतषां समामिव ।
मरणं मानुषो भावः परिवादोऽमतामिव ।।

(ग) दाक्ष्यमेकपदं धर्मं दानमेकपदं यशः ।
सत्यमेकपदं स्वर्ग शीलमेकपदं सुखम् ।।

5. कस्यचिद् श्लोकद्वयस्य उत्कलभाषया अथवा आङ्गलभाषया अनुवादं कुरु । [5 × 2

(क) मातागुरूतरा भूमेः पिता उच्चतरश्च खात् ।
मनः शीघ्रतरं वायोश्चिन्ता बहुतरी नृणाम् ।।

(ख) स्वधर्मे स्थिरता स्थैर्यं धैर्यमिन्द्रियनिग्रहः ।
स्नानं मनोमलत्यागो दानं वै भूतरक्षणम् ।।

(ग) धर्मार्थं ब्राह्मणे दानं यशोऽर्थं नटनर्तके ।
शुत्येषु शरणार्थं वै भयार्थं चैव राजसु ।।

6. केषांचित् पंचानां धातुरूपाणि लिखत । [2 × 5

(क) पठ् – लोट प्रथमपुरुषैकवचने

(ख) नी – लृटि प्रथमपुरुषद्विवचने

(ग) सेव – लङ् मध्यमपुरुष बहुवचने

(घ) दा – लृट् मध्यमपुरुषबहुवचने

(ङ) क्रीण् – लट् उत्तमपुरुषद्विवचने

(च) शी – लृटि प्रथमपुरुषद्विवचने

(छ) कृ – लट् उत्तमपुरुष बहुवचने